Shodhshauryam, International Scientific Refereed Research Journal
© 2018 SHISRRJ | Volume 1 | Issue 4 | ISSN : 2581- 6306

# श्रीसूक्तविवरणमिति मातृकायाः एकमनुशीलनम्

उमादत्तमिश्र

शोधच्छात्र, केन्द्रीयसंस्कृतविश्वविद्यालय, गंगानाथ झा परिसर, इलाहाबाद, उत्तर प्रदेश।

**शोधसारांशः–** धार्मिककृत्येषु खिलभागान्तर्गतस्य श्रीसूक्तस्य प्रयोगः माम् आकृष्टं कृतवान्। यद्यपि श्रीसूक्तम् वैदिकसूक्तम् अस्ति तथापि इदं लोकसम्बद्धम् अस्ति। यतोहि अस्मिन् सूक्ते सा देवी स्तुतिः या इहलोके लौकिकभोगाणां भोगाय जनान् समर्थं करोति। एतदतिरिक्तम् एतेषां मन्त्राणां वर्णनशैली साहित्यिकदृष्ट्यापि आकर्षकं वर्तते। अप्रकाशितामातृकायामुपरि कार्येण सर्वेषां विदुषां जिज्ञासुजनानाश्च सन्तोषः अपि भविष्यति अतोऽस्याः मातृकायाः सम्पादनं समीक्षणं साहित्यिकञ्चाध्ययनं मया कृतम्।

**मुख्यशब्दाः** – श्रीसूक्तम्, मातृका, स्तुतिः, सन्तोषः, मण्डलम्, यथार्थाः।

---

ऋक्संहिता विश्वस्य प्राचीनतमं साहित्यम् अस्ति। ऋग्वेदस्य द्वितीयमण्डलात् सप्तममण्डलपर्यन्तस्य सूक्तानि अपेक्षाकृतानि प्राचीनानि सन्ति। पाश्चात्यविद्वांसः एतदंशं वंशमण्डलस्य नाम्ना अभिहितं कुर्वन्ति। एषु प्रत्येकस्य मण्डलस्य सम्बन्धम् एकैकऋषिणा सह वर्तते। प्रथमं तथा अष्टमं मण्डलं समकालीनम् प्रतीयते। दशमं मण्डलम् अर्वाचीनतमम् अस्ति। दशममण्डलानन्तरम् खिलसूक्तम् परिशिष्टरुपेण अस्ति। **स्वशाखाऽनधीत स्वशाखीयकर्मोपयोगी परशाखीयमन्त्रसंग्रहः एव खिलमुच्यते।**[1] परम्परानुमोदिते सत्यपि शाखान्तरीयताकारणेन एते ऋग्वेदस्य शाकलशाखीयसंहितायां सम्मिलिताः।

श्री-काशीकरस्य संस्करणस्याधारेण वक्तुं शक्यते यत् आहत्य सूक्तानां संख्या 86 अस्ति, येषामध्यायक्रमेण विभाजनमित्थं विद्यते। प्रथमाध्याये 12, द्वितीयाध्याये 16, तृतीयाध्याये 22, चतुर्थाध्याये 14, पञ्चमाध्याये च 22 सूक्तानि सन्ति। खिलसूक्तप्रकरणान्तर्गते अष्टमं सूक्तं श्रीसूक्तम् अस्ति। श्रीसूक्तमुपरि रावण-लक्ष्मणदास-सायण[2]-एफ.ई.हाल-विद्यारण्य-प्रथ्वीधर-श्रीकान्ताचार्य-रङ्गनाथमुनयः[3] व्याख्याम् अकुर्वन् अस्मिन् सूक्ते एकोनत्रिंशन्मन्त्राः सन्ति। किन्तु आदेः पञ्चदशमन्त्राः यथार्थाः सन्ति अवशिष्टाश्च चतुर्दशमन्त्राः तेषां पञ्चदशमन्त्राणां फलानि कथयन्ति। अतएव आचार्यसायणः पञ्चदशमन्त्राणामेव व्याख्याम् अकरोत्।

गङ्गानाथझापरिसरस्य संग्रहालये विद्यमाना मातृका' श्रीसूक्तविवरणम् इति श्रीसूक्तमुपरि व्याख्या अस्ति। एतस्य कर्त्ता अस्ति – श्रीमत्पायगुण्डोपाख्यवैद्यनाथ भट्टः।

**मातृकायाः परिचयः**- इदं श्रीसूक्तविवरणम् श्रीसूक्तस्य व्याख्यानग्रन्थोऽस्ति। यस्य मया सम्पादनार्थं द्वौ हस्तलेखौ प्रयुक्तौ वर्तेते। तौ प्रयागस्थगङ्गानाथ-झा-परिसरस्य हस्तलेखागारात् प्राप्तौ। तयोः अधिगमसंख्या (क) 43044 (ख) 47607 इति वर्तते।

**अधिगमसंख्या** - सम्पादनार्थं मया प्रयागतः गङ्गानाथझापरिसरात् चतसृः पाण्डुलिपीः अधिकृत्य तासां (क) अधिगमसंख्या 53347 (ख) 47607 इति संज्ञा विहिता।

**भाषा** - एतयोः हस्तलेखयोः भाषा संस्कृतं वर्तते।

**लिपिः** - एतयोः हस्तलेखयोः लिपिः देवनागरी वर्तते।

**पत्रसंख्या** - पूर्वोक्तयोः हस्तलेखयोः क्रमशः (क) ग्रन्थे पञ्चाशत्पत्राणि सन्ति। (ख) अष्टात्रिंशत्पत्राणि सन्ति।

**पङ्क्तयः**

1. क-हस्तलेखे प्रतिपृष्ठं मातृकायाः प्रत्येकपृष्ठे नवपङ्कतयः सन्ति। मातृकायाः प्रतिपङ्क्तौ 44 अक्षराणि सन्ति।
2. ख-हस्तलेखे प्रतिपृष्ठं चतुर्दश पङ्क्तयः सन्ति। तत्र च प्रत्येकस्यां पङ्क्तावेकचत्वारिंशदक्षराणि सन्ति।

**आकारः** -

1. क-हस्तलेखस्याकारः - (23.5x10.3 सेंमी) वर्तते।
2. ख-हस्तलेखस्याकारः - (25.5 ×12.5) वर्तते।

**पूर्णताऽपूर्णता वा** - हस्तलेखौ उभौ आरम्भादन्तं यावद् पूर्णौ वर्तेते।

**त्रुटयः** - उभे मातृके प्रायः त्रुटिरहिते वर्तेते, आद्यन्तञ्च पठनीये वर्तेते।

**स्रोतांसि –** राष्ट्रियसंस्कृतसंस्थानाङ्गभूतप्रयागस्थगङ्गानाथझापरिसरस्य हस्तलेखसंग्रहालयतः एतस्य ग्रन्थस्य द्वौ पाण्डिलिपी संगृहीतौ वर्तेते।

प्रयागस्थगङ्गानाथझापरिसरतः प्राप्तेषु हस्तलेखेषु लिपिकारकालादिविषये किमपि नोक्तम्। लिखितं लिपिकारेण पुष्पिकायाम् -

**क-हस्तलेखस्य पुष्पिकायाम् -**

**इति श्रीमत्पायगुण्डोपाख्यवैद्यनाथभट्टविरचितं श्रीसूक्तविवरणं समाप्तम्।**[4]

**ख-हस्तलेखस्य पुष्पिकायाम् -**

**इति श्रीमत्पायगुण्डोपाख्यमहादेवात्मजवैद्यनाथविरचितं श्रीसूक्तविधानं सव्याख्यानं समाप्तम्।**[5]

उपर्युक्तौ समौ हस्तलेखौ मया पाठनिर्धारणार्थं संगृहीतौ। तयोः प्रमुखः समधिगतः क-हस्तलेखः वर्तते। तस्यैव पाठस्य सम्पादितग्रन्थे निर्धारणं कृत्वा हस्तलेखाभ्यां पाठनिर्धारणं कृतवान्। तथा च हस्तलेखयोः पाठभेदे सति यः पाठः ग्राह्यः, शुद्धः, शास्त्रपरम्परया सम्बद्धश्च सः मूले उपादिष्टः। क्वचित् स्थलेषु गुरुभिः सह चर्चा सम्पाद्य शुद्धपाठनिर्धारणः कृतः। तथा क्वचित् स्थलेषु श्रीसूक्तटीकासु समानमवतरणं दृष्ट्वापि शुद्धपाठनिर्धारितम्। प्राप्तयोः हस्तलेखयोः अन्ये अशुद्धाः पाठाः तस्मिन्नेव पृष्ठे टिप्पण्या सह नीच्चैः प्रदर्शिताः।

श्रीसूक्तविवरणस्य ग्रन्थकारः वैद्यनाथपायगुण्डेमहोदयः वर्तते इति सूचना हस्तलेखस्य पुष्पिकायां वर्तते। तदित्थम् -

**इति श्रीमत्पायगुण्डोपाख्यवैद्यनाथभट्टविरचितं श्रीसूक्तविवरणं समाप्तम्।**[6] **इति श्रीमत्पायगुण्डोपाख्यमहादेवात्मजवैद्यनाथविरचितं श्रीसूक्तविधानं सव्याख्यानं समाप्तम्।**[7]

एतदतिरिक्तमन्यद् किञ्चिद् विवरणं नैव प्रस्तुतं ग्रन्थकारेण। परन्तु ख-हस्तलेखस्य पुष्पिकायां पितुः नाम्ना ज्ञायते यदयं नागेशभट्टस्य शिष्यः, महादेवस्यात्मजः मूर्धन्यवैयाकरणः एव वैद्यनाथपायगुण्डे वर्तते।

**समयः**- एतस्य जन्मकालस्य विषये निश्चिता तिथिः यद्यपि न ज्ञायते, तथापि तस्य पुत्रस्य बालम्भट्टस्य निधनकालस्यानुसारं 1830 ई. पू. इति अनुमानं कर्तुं शक्यते।

**स्थानम्** - ग्रन्थकारेणानेन स्वग्रन्थे कुत्रचिदपि स्वस्थानस्य निर्देशो नैव कृतः। किन्तु प्रथितोऽयं ग्रन्थकारः। अतोऽस्य विवरणं ऐतिहासिकग्रन्थेषु हस्तलेखसूचिग्रन्थेषु प्राप्तवान्। तदित्थम् - The grammarian, and patronized by Laksmidevi of Mithila, and lived at Baneres.[8] ग्रन्थकारस्य जन्मस्थानः मिथिला वर्तते। परन्तु कर्मभूमिः वाराणसी वर्तते।

श्रीसूक्तस्य इयं टीका विवरणम् इति नाम्ना वर्तते। अस्यां टीकायां प्रमुखरूपेण तन्त्रागमशास्त्रमधिकृत्य चर्चा कृता वैद्यनाथपायगुण्डेमहोदयेन। श्रीविद्यासमुपासकानां अयं श्रीसूक्तविवरणमिति नाम्नी टीका अवश्यमेव उपकारं प्रदास्यति इति धिया अस्य सम्पादनं समीक्षात्मकमध्ययनं मया कृतम्।

श्रीसूक्तस्य महत्त्वविषये ग्रन्थस्यादावुक्तं ग्रन्थकारेण वैद्यनाथपायगुण्डेमहाशयेन। तदित्थम् –

**ये जातवेदस इत्येतत्सूक्तं सर्वार्थसाधकम्।**
**आयुरारोग्यसुखदं भूमिदं शत्रुनाशनम्।।**
**यद्यद्वाञ्छति वा विप्रस्तदवाप्नोत्यसंशयः।**
**सूक्तेनानेन जुहुयाद्युचौ देशे द्विजो बहुः।।**
**गोष्ठे देवालये वाऽपि नदीतीरग्रहेऽपि वा।**
**प्रातर्मध्याह्नयोः[9] स्नातः प्रदोषे च विशेष्मः।।**
**मंत्रेणानेन जुहुयाद् शुक्लाम्बरधरः शुचिः।**
**जपेद्वा नियमो मंत्रं हविष्याशी जितेन्द्रियः।।**
**पशुपुत्रधनार्थी च प्रत्येकं लक्षमभ्यसेत्।**
**सर्वेषामेव देशानां विशिष्टो देवतालयः।।**
**तस्माद्देवालये कुर्वन् विशिष्टं फलमश्नुते।**
**तत्र प्राची प्रशस्तादिगाग्नेयी च विशेषतः।।**

सन्तानप्राप्त्यर्थमपि ग्रन्थकारेणोक्तमपि।

**तनयं लभते सौम्यं मंत्रशास्त्रप्रभावतः।।**
**देवकीसुतगोविन्दवासुदेवजगत्पते।**
**देहि मे तनयं कृष्ण ! त्वामहं शरणं गतः।।**

ज्वरनिवारणार्थमपि मन्त्रप्रभावं प्रदर्शयति ग्रन्थकारः वैद्यनाथपायगुण्डेमहाशयः।

**कुबेरं ते मुखं रौद्रं नन्दिमानन्दिमावह।**
**ज्वरं मृत्युं भयं घोरं नाशय मे ज्वरम्।।**

औषधिः, मुद्रा, दीक्षाकालः इत्यादीनां विषयाणामपि वर्णनं कृतम्। अतः न केवलं लक्ष्मीप्राप्त्यर्थविषयकी चर्चा अपितु अन्यान्यपि बहूनि वैशिष्ट्यानि सन्ति अस्मिन् ग्रन्थे।

धार्मिककृत्येषु खिलभागान्तर्गतस्य श्रीसूक्तस्य प्रयोगः माम् आकृष्टं कृतवान्। यद्यपि श्रीसूक्तम् वैदिकसूक्तम् अस्ति तथापि इदं लोकसम्बद्धम् अस्ति। यतोहि अस्मिन् सूक्ते सा देवी स्तुतिः या इहलोके लौकिकभोगाणां भोगाय जनान् समर्थं करोति। एतदतिरिक्तम् एतेषां मन्त्राणां वर्णनशैली साहित्यिकदृष्ट्यापि आकर्षकं वर्तते।

अप्रकाशितामातृकायामुपरि कार्येण सर्वेषां विदुषां जिज्ञासुजनानाश्च सन्तोषः अपि भविष्यति अतोऽस्याः मातृकायाः सम्पादनं समीक्षणं साहित्यिकञ्चाध्ययनं मया कृतम्।

**सन्दर्भः**

1. परशाखीयं स्वशाखायामपेक्षावशात् पठ्यते तत् खिलमुच्यते। महाभारतनीलकण्ठटीका, शान्तिपर्वम् 323.10

2. कैटलगेज कैटलगुरम् By थियोडोर आफरेट

3. 'वैदिकविब्लियोग्राफी'

4.क-हस्तलेखः श्रीसूक्तविवरणम्।

5. ख-हस्तलेख श्रीसूक्तविवरणम्।

6. क-हस्तलेखः श्रीसूक्तविवरणम्।

7. ख-हस्तलेख श्रीसूक्तविवरणम्।

8.New catalogus catalogorum vol-xxxii, pg no. 8, editor in chief dr. siniuddh das - University of madras 2013

9. प्रातर्मध्यान्हयोः इति पाठः क-हस्तलेखे। श्रीवैद्यनाथपायगुण्डेविरचितश्रीसूक्तविवरणस्य समीक्षात्मकं सम्पादनम्।